आकुञ्च् or व्यावृत् (c. 10. -वर्त्तयति -यितुं

INTERVAL, *s.* (Intermediate space) अन्तरं, अभ्यन्तरं, अभ्यन्तरस्थानं, अन्तरालः, अवकाशः, मध्यः, मध्यस्थानं, व्यवधानं, व्यवायः, सन्धिः *m.* —(Interval of time) कालान्तरं, अभ्यन्तरकालः, मध्यकालः, अवकाशः, अन्तरावसरः, अवधिः *m.*—(Pause, remission) विरामः, विच्छेदः, विरतिः *f.*, निवृत्तिः *f.*, सन्धिः *m.*, उपशमः, शान्तिः *f.*; 'without interval,' अनन्तरः -रा -रं, निरन्तरः -रा -रं, निरन्तरालः -ला -लं; 'at intervals,' काले काले, वारं वारं, शनैस्; 'interval between the equinoxes,' अयनकालः.

To INTERVENE, *v. n.* मध्ये गम् (c. 1. गच्छति, गन्तुं) or आगम् or आया (c. 2. -याति -तुं), अन्तर्गम्, अन्तरागम्, अन्तर्या, अन्तराया, मध्ये वृत् (c. 1. वर्त्तते -र्त्तितुं), अन्तर्वृत्, मध्ये स्था (c. 1. तिष्ठति, स्थातुं) or उपस्था, अन्तरि (c. 2. -एति -तुं, c. 1. -अयति), मध्ये चर् (c. 1. चरति -रितुं), व्यवधा in pass. (-धीयते), व्यवहितः -ता -तं भू, अन्तर्गतः -ता -तं भू, अन्तरितः -ता -तं भू.

INTERVENIENT, INTERVENING, *a.* or *part.* मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), व्यवहितः -ता -तं, अन्तर्गतः -ता -तं, अन्तरागतः -ता -तं, व्यवधायकः -का -कं, अन्तरितः -ता -तं, मध्यगः -गा -गं, मध्यमः -मा -मं, अन्तर्धायकः -का -कं, मध्यचारी -रिणी -रि (न्), मध्यस्थः -स्था -स्थं -स्थायी -यिनी -यि (न्), विचालः -ला -लं; 'intervening space,' अभ्यन्तरं, अन्तरं.

INTERVENTION, *s.* अन्तर्गमनं, अन्तरागमनं, व्यवधानं, मध्यवर्त्तनं, मध्यवर्त्तित्वं, मध्यस्थता, माध्यस्थ्यं, अन्तरायः, व्यवहितत्वं, व्यवधायकत्वं, योगः; 'by the intervention of another,' अन्यं नियुज्य.

INTERVIEW, *s.* अन्योन्यदर्शनं, परस्परदर्शनं, अन्योन्यदृष्टिः *f.*, दर्शनं, सन्दर्शनं, समागमः, सङ्गमः, समास्या, परस्परालापः.

To INTERWEAVE, *v. a.* परस्परं ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति -न्थितुं) or खच् (c. 10. खचयति -यितुं) or उत्खच्, परस्परं विरच् (c. 10. -रचयति -यितुं) or संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), परस्परसंयोगं कृ, परस्पराश्लेषं कृ, परस्परसंसर्गं कृ.—(Intermingle) सम्मिश्र् (c. 10. -मिश्रयति -यितुं), व्यामिश्र्, विमिश्र्, सम्मिश्रीकृ.

INTERWOVEN, *p. p.* ग्रथितः -ता -तं, उद्ग्रथितः -ता -तं, खचितः -ता -तं, अनुविद्धः -द्धा -द्धं, परस्पराश्लिष्टः -ष्टा -ष्टं, परस्परसंयुक्तः -क्ता -क्तं, व्यामिश्रः -श्रा -श्रं, सम्मिश्रः -श्रा -श्रं, सम्मिश्रीभूतः -ता -तं, करम्बितः -ता -तं.

INTESTABLE, *a.* मृतपत्रकरणाक्षमः -मा -मं, मृत्युपत्रानधिकारी -रिणी -रि (न्), मृतलेखकरणाशक्तः -क्ता -क्तं.

INTESTACY, *s.* अकृतमृतपत्रता, अकृतमृत्युलेखत्वं, मृत्युपत्रम् अकृत्वा or अलिखित्वा मरणं.

INTESTATE, *a.* अकृतमृत्युपत्रः -त्रा -त्रं, अकृतमृतलेखः -खा -खं, मृत्युपत्रम् अकृत्वा or अलिखित्वा मृतः -ता -तं.

INTESTINAL, *a.* आन्त्रिकः -की -कं, औदर्यः -र्यी -र्यं, धमनीलः -ला -लं, अन्त्रसम्बन्धी -न्धिनी -न्धि (न्), नाडिसम्बन्धी &c.

INTESTINE, *s.* (Bowel) अन्त्रं, नाडिः -डी *f.*, अन्तर्नाडी, नाली -लिः *f.*, पुरीतत् *m. n.*, धमनी -निः *f.*, शिरा, सिरा, कोष्ठः, उदरं, जठरः -रं, मलाशयः, पुरीषाशयः.

INTESTINE, *a.* (Internal) अन्तर्वर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तर्भवः -वा -वं, आन्तरः -री -रं, आन्तरिकः -की -कं, आभ्यन्तरः -री -रं, अबाह्यः -ह्या -ह्यं—(Domestic, not foreign) स्वदेशीयः -या -यं, दैशिकः -की -कं, अविदेशजः -जा -जं, अविदेशीयः -या -यं, देशीयः -या -यं, स्वदेशान्तर्गतः -ता -तं; 'intestine broils,' गृहकलहः, गृहभेदः.

To INTHRAL, *v. a.* दासीकृ, वशीकृ, करदीकृ. *See* ENSLAVE.

INTHRALMENT, *s.* दास्यं, दासत्वं, दासभावः, परवशत्वं, बन्धनं.

To INTHRONE, *v. a.* सिंहासने उपविश् (c. 10. -वेशयति -यितुं). *See* ENTHRONE.

INTIMACY, *s.* परिचयः, सुपरिचयः, सौहृद्यं, दृढसौहृद्यं, संसर्गः, सुसंसर्गः, दृढसंसर्गः, संसर्गित्वं, परस्परपरिज्ञानं, परिज्ञानं, संसक्तिः *f.*, आसङ्गः, संस्तवः, दृढसंयोगः, अतिसौहृद्यं, अतिसौहार्द्दं, अतिमित्रता, अतिप्रणयः, अतिमैत्र्यं, अतिसख्यं, संघट्टनं.

INTIMATE, *a.* (Inward) अन्तरस्थः -स्था -स्थं, अन्तर्भवः -वा -वं, अन्तर्गतः -ता -तं, अन्तर्भूतः -ता -तं, आन्तरः -री -रं, आभ्यन्तरः -री -रं, अन्तरतमः -मा -मत्, अन्तरङ्गः -ङ्गा -ङ्गं.—(Close) गाढः -ढा -ढं, दृढः -ढा -ढं, सुदृढः -ढा -ढं.—(Near) सन्निकृष्टः -ष्टा -ष्टं, निकटः -टा -टं, सन्निहितः -ता -तं.—(Close in friendship) दृढसौहृदः -दा -दं, परिचितः -ता -तं, सुपरिचितः -ता -तं, सुहृत्तमः -मा -मं, संसर्गी -र्गिणी -र्गि (न्), सुसंसर्गी &c., संसक्तः -क्ता -क्तं, सुसंसक्तः -क्ता -क्तं, संस्तुतः -ता -तं, परस्परज्ञः -ज्ञा -ज्ञं.

INTIMATE, *s.* (A friend) सुपरिचितः, दृढसुहृद् *m.*, दृढमित्रं, सुसंसर्गी *m.* (न्), सुहृत्तमः, प्रियसुहृद्, प्रियवयस्यः.

To INTIMATE, *v. a.* सूच् (c. 10. सूचयति -यितुं), संसूच्, अनुसूच्, उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्, सूचनां कृ, इङ्गितं कृ, सङ्केतं कृ, आकूतं कृ, उपन्यस् (c. 4. -अस्यति -असितुं), प्रतिपद् (c. 10. -पादयति -यितुं).

INTIMATED, *p. p.* सूचितः -ता -तं, अनुसूचितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं.

INTIMATELY, *adv.* (Closely) दृढं, सुदृढं, गाढं.—(With close friendship) दृढसौहृद्येन, सुपरिचितं, सुपरिचितवत्, दृढमित्रवत्, सुहृत्तमं, सुसंसर्गेण, दृढसंसर्गेण; 'intimately connected,' दृढसम्बन्धी -न्धिनी -न्धि (न्), दृढसंसर्गी -र्गिणी -र्गि (न्).

INTIMATION, *s.* सूचना -नं, सूचितं, उद्देशः -शनं, सन्देशः, समुद्देशः -शनं, इङ्गितं, सङ्केतः, उपन्यासः, आकारः, व्यंग्यः, व्यंग्योक्तिः *f.*, वक्रोक्तिः *f.*, वक्रवाक्यं, साकूतं, परिकरः.

To INTIMIDATE, *v. a.* त्रस् (c. 10. त्रासयति -यितुं), संत्रस्, वित्रस्, भी in caus. (भाययति -यितुं or भीषयति -यितुं), भयहेतुं दर्शयित्वा निवृत् (c. 10. -वर्त्तयति -यितुं) or निवृ (c. 10. -वारयति -यितुं), सभयं -यां -यं कृ.—(Dishearten) धैर्य्यभङ्गं कृ, उत्साहभङ्गं कृ.—(Threaten) भर्त्स् (c. 10. भर्त्सयति -यितुं).

INTIMIDATED, *p. p.* त्रासितः -ता -तं, भीषितः -ता -तं, जातशङ्कः -ङ्का -ङ्कं.

INTIMIDATION, *s.* त्रासकरणं, भीषणं, भीषा, भयकरणं, भयदर्शनं, भयप्रदर्शनं भर्त्सनं, भर्त्सनकरणं, धैर्य्यभङ्गः.

INTO, *prep.* मध्ये, अन्तर्, अन्तरे, अभ्यन्तरे, अन्तरेण; 'into the forest,' अरण्यमध्ये. When 'into' follows verbs of motion it may be expressed by the accus. c.; as, 'come into the house,' गृहम् आयाहि; 'the river runs into the ocean,' नदी समुद्रं विशति. When it follows verbs denoting examination or inspection it may also be expressed by the acc. c.; as, 'he looks into the letter,' पत्रं निरूपयति. When it follows verbs denoting insertion or inclusion it may be expressed by the loc. c.; as, 'he inserts the wedge into the wood,' कीलं काष्ठे निवेशयति. When it follows verbs denoting mixture it may be expressed by the instrum. c., or by सह with the instrum. c.; as, 'he puts the wine into the water,' मद्यं जलेन सह मिश्रयति. When 'into' denotes the passing of a thing from one state to another it may be expressed by the affixed सात्; as, 'converted into water,' जलसात्कृतः -ता -तं, or by changing the final of the noun